श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीता

॥ श्री गरुडपञ्चाशत् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री गरुडपञ्चाशत् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

परव्यूहवर्णकः

अङ्गेष्वानन्दमुख्यश्रुतिशिखरमिळद्दण्डकं गण्डपूर्वं
प्रागेवाभ्यस्य षट्सु प्रतिदिशमनघं न्यस्तशुद्धास्त्रबन्धाः।
पक्षिव्यत्यस्तपक्षिद्वितयमुखपुटप्रस्फुटोदारतारं
मन्त्रं गारुत्मतं तं हुतवहदयिताशेखरं शीलयामः॥ **1** ॥

वेदः स्वार्थाधिरूढो बहिरबहिरभिव्यक्तिमभ्येति यस्यां
सिद्धिः साङ्कर्षणी सा परिणमति यया सापवर्गात्रिवर्गा।
प्राणस्य प्राणमन्यं प्रणिहितमनसो यत्र निर्धारयन्ति
प्राची सा ब्रह्मविद्या परिचितगहना पातु गारुत्मती नः॥ **2** ॥

नेत्रं गायत्रमूचे त्रिवृदिति च शिरो नामधेयं यजूंषि
छन्दांस्यङ्गानि धिष्ण्यात्मभिरजनि शफैर्विग्रहो वामदेव्यम्।
यस्य स्तोमात्मनोऽसौ बृहदितरगरुत् तादृशाम्नातपुच्छः
स्वाच्छन्द्यं नः प्रसूतां श्रुतिशतशिखराभिष्टुतात्मा गरुत्मान्॥ **3** ॥

यो यं धत्ते स्वनिष्ठं वहनमपि वरः स्पर्शितो येन यस्मै
यस्माद्यस्याहवश्रीर्विदधति भजनं यत्र यत्रेति सन्तः।
प्रायो देवः स इत्थं हरिगरुडभिदाकल्पितारोहवाह -
स्वाभाव्यः स्वात्मभव्यः प्रदिशतु शकुनिर्ब्रह्मसब्रह्मतां नः॥ **4** ॥

एको विष्णोर्द्वितीयस्त्रिचतुरविदितं पञ्चवर्णीरहस्यं
षाड्गुण्यस्मेरसप्तस्वरगतिरणिमाद्यष्टसंपन्नवात्मा।
देवो दर्वीकरारिर्दशशतनयनारातिसाहस्रलक्षे
विक्रीडत्पक्षकोटिर्विघटयतु भयं वीतसङ्ख्योदयो नः॥ **5** ॥

सत्याद्यैः सात्वतादिप्रथितमहिमभिः पञ्चभिर्व्यूहभेदैः
पञ्चाभिख्यो निरुन्धन् भवगरळभवं प्राणिनां पञ्चभावम्।
प्राणापानादिभेदात् प्रतितनु मरुतो दैवतं पञ्चवृत्तेः
पञ्चात्मा पञ्चधाऽसौ पुरुष उपनिषद्घोषितस्तोषयेन्नः॥ **6** ॥

श्लिष्यद्भोगीन्द्रभोगे श्रुतिनिकरनिधौ मूर्तिभेदे स्वकीये
वर्णव्यक्तीर्विचित्राः परिकलयति यो वक्त्रबाहूरुपादैः।
प्राणः सर्वस्य जन्तोः प्रकटितपरमब्रह्मभावः स इत्थं
क्लेशं छिन्दन् खगेशः सपदि विपदि नः सन्निधिः सन्निधत्ताम्॥ **7** ॥

अग्रे तिष्ठन्नुदग्रो मणिमुकुर इवानन्यदृष्टेर्मुरारेः
पायान्मायाभुजङ्गीविषमविषभयाद्गाढमस्मान् गरुत्मान्।
क्षुभ्यत्क्षीराब्धिपाथस्सहभवगरळस्पर्शशङ्की स शङ्के
छायां धत्ते यदीयां हृदि हरिहृदयारोहधन्यो मणीन्द्रः॥ **8** ॥

अमृताहरणवर्णकः

आहर्तारं सुधाया दुरधिगममहाचक्रदुर्गस्थितायाः
जेतारं वज्रपाणेः सह विबुधगणैराहवे बाहुवेगात्।
विष्णौ संप्रीयमाणे वरविनिमयतो विश्वविख्यातकीर्तिं
देवं याऽसूत साऽसौ दिशतु भगवती शर्म दाक्षायणी नः॥ **9** ॥

वित्रासाद्वीतिहोत्रं प्रथममधिगतैरन्तिके मन्दधाम्ना
भूयस्तेनैव सार्धं भयभरतरळैर्वन्दितो देवबृन्दैः।

कल्पान्तक्षोभदक्षं कथमपि कृपया सङ्क्षिपन् धाम चण्डं
भित्त्वाऽण्डं निर्जिहानो भवभयमिह नः खण्डयत्वण्डजेन्द्रः ॥ **10** ॥

क्षुण्णक्षोणीधराणि क्षुभितचतुरकूपारतिम्यद्दरुन्ति
त्रुट्यत्तारासराणि स्थपुटितविबुधस्थानकानि क्षिपेयुः।
पाताळब्रह्मसौधावधिविहितमुधाऽऽवर्तनान्यस्मदार्तिं
ब्रह्माण्डस्यान्तराळे बृहति खगपतेरर्भकक्रीडितानि ॥ **11** ॥

संविच्छस्त्रं दिशन्त्या सह विजयचमूराशिषः प्रेषयन्त्या
संबध्नन्त्या तनुत्रं सुचरितमशनं पक्कणं निर्दिशन्त्या।
एनोऽस्मद्वैनतेयो नुदतु विनतया क्लृप्तरक्षाविशेषः
कद्रूसङ्केतदास्यक्षपणपणसुधालक्षभैक्षं जिघृक्षुः ॥ **12** ॥

विक्षेपैः पक्षतीनामनिभृतगतिभिर्वादितव्योमतूर्यः
वाचालाम्भोधिवीचीवलयविरचितालोकशब्दानुबन्धः।
दिक्कन्याकीर्यमाणक्षरदुडुनिकरव्याजलाजाभिषेकः
नाकोन्माथाय गच्छन् नरकमपि स मे नागहन्ता निहन्तु ॥ **13** ॥

ऋक्षाक्षक्षेपदक्षो मिहिरहिमकरोत्तालताळाभिघाती
वेलावाःकेळिलोलो विविधघनघटाकन्दुकाघातशीलः।
पायान्नः पातकेभ्यः पतगकुलपतेः पक्षविक्षेपजातः
वातः पाताळहेलापटहपटुरवारम्भसंरम्भधीरः ॥ **14** ॥

किं निर्घातः किमर्कः परिपतति दिवः किं समिद्धोऽयमौर्वः
किंस्वित् कार्तस्वराद्रिर्ननु विदितमिदं व्योमवर्त्मा गरुत्मान्।
आसीदत्याजिहीर्षत्यभिपतति हरत्यत्ति हा तात हाऽम्बे -
त्यालापोद्युक्तभिल्लाकुलजठरपुटः पातु नः पत्रिनाथः ॥ **15** ॥

आसृक्व्याप्तैरसृग्भिर्दुरुपशमतृषाशातनी शातदंष्ट्रा -
कोटीलोटत्करोटीविकटकटकटारावघोरावतारा।

भिन्द्यात् सार्धं पुळिन्द्या सपदि परिहृतब्रह्मका जिह्मगारेः
उद्वेल्लद्भिल्लपल्लीनिगरणकरणा पारणा कारणां नः॥ **16** ॥

स्वच्छन्दस्वर्गिबृन्दप्रथमतममहोत्पातनिर्घातघोरः
स्वान्तध्वान्तं निरुन्ध्याद्धुतधरणिपयोराशिराशीविषारेः।
प्रत्युद्यद्भिल्लपल्लीभटरुधिरसरिल्लोलकल्लोलमाला -
हालानिर्वेशहेलाहलहलबहुलो हर्षकोलाहलो नः॥ **17** ॥

सान्द्रक्रोधानुबन्धात् सरसि नखमुखे पादपे गण्डशैले
तुण्डाग्रे कण्ठरन्ध्रे तदनु च जठरे निर्विशेषं युयुत्सू।
अव्यादस्मानभव्यादविदितनखरश्रेणिदंष्ट्राभिघातौ
जीवग्राहं गृहीत्वा कमठकरटिनौ भक्षयन् पक्षिमल्लः॥ **18** ॥

अल्पः कल्पान्तलीलानटमकुटसुधासूतिखण्डो बहूनां
निःसारस्त्वद्भुजाद्रेरनुभवतु मुधा मन्थनं त्वेष सिन्धुः।
राकाचन्द्रस्तु राहोः स्वमिति कथयतः प्रेक्ष्य कद्रूकुमारान्
सान्तर्हासं खगेन्द्रः सपदि हृतसुधस्त्रायतामायतान्नः॥ **19** ॥

आरादभ्युत्थितैरावतममितजवोदञ्चदुच्चैःश्रवस्कं
जातक्षोभं विमथ्नन् दिशि दिशि दिविषद्वाहिनीशं क्षणेन।
भ्राम्यन् सव्यापसव्यं सुमहति मिषति स्वर्गिसार्थे सुधार्थं
प्रेङ्खन्नेत्रः श्रियं नः प्रकटयतु चिरं पक्षवान् मन्थशैलः॥ **20** ॥

अस्थानेषु ग्रहाणामनियतविहितानन्तवक्रातिचाराः
विश्वोपाधिव्यवस्थाविगमविलुळितप्रागवागादिभेदाः।
द्वित्राः सुत्रामभक्तग्रहकलहविधावण्डजेन्द्रस्य चण्डाः
पक्षोत्क्षेपा विपक्षक्षपणसरभसाः शर्म मे निर्मिमीरन्॥ **21** ॥

तत्तत्प्रत्यर्थिसारावधिविहितमृषारोषगन्धो रुषान्धैः
एकः क्रीडन्ननेकैः सुरपतिसुभटैरक्षतो रक्षतान्नः।

अन्योन्याबद्धलक्षापहरणविहितामन्दमात्सर्यतुङ्गैः
अङ्गैरेव स्वकीयैरहमहमिकया मानितो वैनतेयः ॥ 22 ॥

अस्तव्योमान्तमन्तर्हितनिखिलहरिन्मण्डलं चण्डभानोः
लुण्टाकैर्यैरकाण्डे जगदखिलमिदं शर्वरी वर्वरीति।
प्रेङ्खोळत्स्वर्गगोळः स्खलदुडुनिकरस्कन्धबन्धान् निरुन्धन्
रंहोभिस्तैर्मदंहो हरतु तरळितब्रह्मसद्मा गरुत्मान् ॥ 23 ॥

यः स्वाङ्के सङ्गरान्तर्गरुदनिललवस्तम्भिते जम्भशत्रौ
कुण्ठास्त्रे सन्नकण्ठं प्रणयति पवये पक्षलेशं दिदेश।
सोऽस्माकं संविधत्तां सुरपतिपृतनाद्वन्द्वयुद्धैकमल्लः
माङ्गळ्यं वालखिल्यद्विजवरतपसां कोऽपि मूर्तो विवर्तः ॥ 24 ॥

रुद्रान् विद्राव्य सेन्द्रान् हुतवहसहितं गन्धवाहं गृहीत्वा
कालं निष्काल्य धूत्वा निर्ऋतिधनपती पाशिनं क्लेशयित्वा।
सर्पाणां छाद्मिकानाममृतमयपणप्रापणप्राप्तदर्पः
निर्बाधं क्वापि सर्पन्नपहरतु हरेरौपवाह्यो मदंहः ॥ 25 ॥

नागदमनवर्णकः

भुग्नभ्रूर्भ्रूकुटीभृद्भ्रमदमितगरुत् क्षोभितक्ष्मान्तरिक्षः
चक्राक्षो वक्रतुण्डः खरतरनखरः क्रूरदंष्ट्राकराळः।
पायादस्मानपायाद्भयभरविगळद्दन्दशूकेन्द्रशूकः
शौरेः सङ्क्रन्दनादिप्रतिभटपृतनाक्रन्दनः स्यन्दनेन्द्रः ॥ 26 ॥

अर्यम्णा धुर्ययोक्त्रग्रसनभयभृता सान्त्वितोऽनूरुबन्धात्
कोदण्डज्यां जिघृक्षेदिति चकितधिया शङ्कितः शङ्करेण।
तल्पे कल्पेत मा ते मतिरिति हरिणाऽप्यादरेणानुनीतः
पक्षीन्द्रस्त्रायतां नः फणधरमहिषीपत्रभङ्गापहारी ॥ 27 ॥

छायाताक्ष्र्यानहीनां फणमणिमुकुरश्रेणिविस्पष्टबिम्बान्
त्राणापेक्षाधृतस्वप्रतिकृतिमनसा वीक्ष्य जातानुकम्पः।
तेषां दृष्ट्वाऽथ चेष्टाः प्रतिगरुडगणाशङ्कया तुङ्गरोषः
सर्पन् दर्पोद्धतो नः शमयतु दुरितं सर्पसन्तानहन्ता ॥ 28 ॥

उच्छ्वासाकृष्टतारागणघटितमृषामौक्तिकाकल्पशिल्पः
पक्षव्याधूतपाथोनिधिकुहरगुहागर्भदत्तावकाशः।
दृष्टिं दंष्ट्राग्रदूतीं पृथुषु फणभृतां प्रेषयन्नुत्तमाङ्गे -
ष्वङ्गैरङ्गानि रुन्धन्नवतु पिपतिषुः पत्रिणामग्रणीर्नः ॥ 29 ॥

आवेधःसौधशृङ्गादनुपरतगतेराभुजङ्गेन्द्रलोकात्
श्रेणीबन्धं वितन्वन् क्षणपरिणमितालातपातप्रकारः।
पायान्नः पुण्यपापप्रचयमयपुनर्गर्भकुम्भीनिपातात्
पाताळस्यान्तराळे बृहति खगपतेर्निर्विघातो निपातः ॥ 30 ॥

प्रत्यग्राकीर्णतत्तत्फणमणिनिकरे शङ्कुलाकोटिवक्रं
तुण्डाग्रं सङ्क्षुवानः कुलगिरिकठिने कर्परे कूर्मभर्तुः।
पाताळक्षेत्रपक्वद्विरसनपृतनाशालिविच्छेदशाली
शैलीं नः सप्तशैलीलघिमदरभसः सौतु साध्वीं सुपर्णः ॥ 31 ॥

पर्यस्यत् पन्नगीनां युगपदसमयानर्भकान् गर्भकोशात्
ब्रह्मस्तम्बप्रकम्पव्यतिषजदखिलोदन्वदुन्निद्रघोषम्।
चक्षुश्चक्षुः श्रुतीनां सपदि बधिरयत् पातु पत्रीश्वरस्य
क्षिप्रक्षिप्तक्षमाभृत् क्षणघटितनभःस्फोटमास्फोटितं नः ॥ 32 ॥

तोयस्कन्धो न सिन्धोः समघटत मिथः पक्षविक्षेपभिन्नः
पाताळं न प्रविष्टं पृथुनि च विवरे रश्मिभिस्तिग्मरश्मेः।
तावद्ग्रस्ताहिवक्त्रक्षरितविषमषीपङ्ककस्तूरिकाङ्कः
प्रत्यायातः स्वयूथ्यैः स्थित इति विदितः पातु पत्रीश्वरो नः ॥ 33 ॥

बद्धस्पर्धैरिव स्वैर्बहुभिरभिमुखैरेककण्ठं स्तुवाने
तत्तद्विश्वोपकारप्रणयिसुरगणप्रार्थितप्राणरक्षे।
पायान्नः प्रत्यहं ते कमपि विषधरं प्रेषयामीति भीते
सन्धित्सौ सर्पराजे सकरुणमरुणानन्तरं धाम दिव्यम् ॥ 34 ॥

क्वाप्यस्थ्ना शर्कराढ्यं क्वचन घनतरासृक्छटाशीधुदिग्धं
निर्मोकैः क्वापि कीर्णं विषयमपरतो मण्डितं रत्नखण्डैः।
अध्यारूढैः स्ववारेष्वहमहमिकया वध्यवेषं दधानैः
काले खेलन् भुजङ्गैः कलयतु कुशलं काद्रवेयान्तको नः ॥ 35 ॥

परिष्कारवर्णकः

वामे वैकुण्ठशय्याफणिपतिकटको वासुकिब्रह्मसूत्रः
रक्षेन्नस्तक्षकेण ग्रथितकटितटश्चारुकार्कोटहारः।
पद्मं कर्णेऽपसव्ये प्रथिमवति महापद्ममन्यत्र बिभ्रत्
चूडायां शङ्खपालं गुळिकमपि भुजे दक्षिणे पक्षिमल्लः ॥ 36 ॥

वर्त्याभस्वस्तिकाग्रस्फुरदरुणशिखादीप्ररत्नप्रदीपैः
बध्नद्भिस्तापमन्तर्बहुळविषमषीगन्धतैलाभिपूर्णैः।
नित्यं नीराजनार्थं निजफणफलकैर्घूर्णमानानि तूर्णं
भोगैरापूरयेयुर्भुजगकुलरिपोर्भूषणानीषणां नः ॥ 37 ॥

अङ्गप्रत्यङ्गलीनामृतरसविसरस्पर्शलोभादिवान्त -
स्त्रासाद्ग्रासानुबन्धादिव सहजमिथोवैरशङ्कोत्तरङ्गात्।
रुद्रागाढोपगूढोच्छ्वसननिबिडितस्थानयोगादिवास्मद् -
भद्राय स्युर्भजन्तो भगवति गरुडे गाढतां गूढपादः ॥ 38 ॥

कोटीरे रत्नकोटिप्रतिफलिततया नैकधा भिन्नमूर्तिः
वल्मीकस्थान् स्वयूथ्यानभित इव निजैर्वेष्टनैः क्लृप्तरक्षः।

क्षेमं नः सौतु हेमाचलविधृतशरन्मेघलेखानुकारी
रोचिश्चूडालचूडामणिरुरगरिपोरेष चूडाभुजङ्गः ॥ 39 ॥

द्राघीयःकर्णपाशद्युतिपरिभवनव्रीडयेव स्वभोगं
सङ्क्षिप्याश्नन् समीरं दरविनतमुखो निःश्वसन् मन्दमन्दम् ।
आसीदद्दण्डभित्तिप्रतिफलनमिषात् क्वापि गूढं विविक्षुः
क्षिप्रं दोषान् क्षिपेन्नः खगपतिकुहनाकुण्डलः कुण्डलीन्द्रः ॥ 40 ॥

वालाग्रग्रन्थिबन्धग्रथितपृथुशिरोरत्नसन्दर्शनीयः
मुक्ताशुभ्रोदराभो हरिमणिशकलश्रेणिदृश्येतरांशः ।
विष्वग्दम्भोळिधाराव्रणकिणविषमोत्तम्भनस्तब्धवृत्तिः
व्याळाहारस्य हृद्यो हरतु स मदघं हारदर्वीकरेन्द्रः ॥ 41 ॥

वैकक्ष्यस्रग्विशेषच्छुरणपरिणमच्छस्त्रबन्धानुबन्धः
वक्षःपीठाधिरूढो भुजगदमयितुर्ब्रह्मसूत्रायमाणः ।
अश्रान्तस्वैरनिद्राविरचितविविधोच्छ्वासनिःश्वासवेग -
क्षामोच्छूनाकृतिर्नः क्षपयतु दुरितं कोऽपि कद्रूकुमारः ॥ 42 ॥

श्लिष्यद्रुद्रासुकीर्तिस्तनतटघुसृणालेपसङ्क्रान्तसार -
स्फारामोदाभिलाषोन्नमितपृथुफणाचक्रवाळाभिरामः ।
प्रायः प्रेयःपटीरद्रुमविटपधिया श्लिष्टपक्षीन्द्रबाहुः
व्याहन्यादस्मदीयं वृजिनभरमसौ बृन्दशो दन्दशूकः ॥ 43 ॥

ग्रस्तानन्तर्निविष्टान् फणिन इव शुचा गाढमाश्लिष्य दुःख्यन्
क्षुण्णानेकः स्वबन्धून् क्षुधमिव कुपितः पीडयन् वेष्टनेन ।
व्याळस्तार्क्ष्योदरस्थो विपुलगळगुहावाहिफूत्कारवात्या -
पौनःपुन्येन हन्यात् पुनरुदरगुहागेहवास्तव्यतां नः ॥ 44 ॥

गाढासक्तो गरुत्मत्कटितटनिकटे रक्तचण्डातकाङ्के
फक्कत्काञ्चीमहिम्ना फणमणिमहसा लोहिताङ्गो भुजङ्गः ।

सत्तासांसिद्धिकं नः सपदि बहुविधं कर्मबन्धं निरुन्ध्यात्
विन्ध्याद्र्यालीनसन्ध्याघनघटिततटित्कान्तिचातुर्यधुर्यः ॥ **45** ॥

अद्भुतवर्णकः

वेगोत्तानं वितानं व्यजनमनुगुणं वैजयन्ती जयन्ती
मित्रं नित्याभ्यमित्रं युधि विजयरथो युग्ययोगानपेक्षः।
दासो निष्पर्युदासो दनुतनयभिदो निःसहायः सहायः
दोधूयेतास्मदीयं दुरितमधरितारातिपक्षैः स्वपक्षैः ॥ **46** ॥

उक्षा दक्षान्तकस्य स्खलति वलजितः कुञ्जरः खञ्जरीतिः
क्लान्तो धातुः शकुन्तोऽनुग इति दयया सामिरुद्धस्यदोऽपि।
ग्राहग्रस्तद्विपेन्द्रक्षतिभयचकिताकुण्ठवैकुण्ठचिन्ता -
नासीरोदारमूर्तिर्नरकविहतये स्ताद्विहङ्गेश्वरो नः ॥ **47** ॥

वेगोद्वेलः सुवेले किमिदमिति मिथो मन्त्रितो वानरेन्द्रैः
मायामानुष्यलीलामभिनयति हरौ लब्धसेवाविशेषः।
वैदेहीकर्णपूरस्तबकसुरभिणा यः समाश्लेषि दोष्णा
तृष्णापारिप्लवानां स भवतु गरुडो दुःखवारिप्लवो नः ॥ **48** ॥

दुग्धोदन्वत्प्रभूतः स्वकमहिमपृथुर्विष्णुना कृष्णनाम्ना
पिञ्छाकल्पानुकल्पः समघटि सुदृढो यत्प्रदिष्टः किरीटः।
वीरो वैरोचनास्त्रव्रणकिणगुणितोदग्रनिर्घातघातः
सङ्घातं सर्पघाती स हरतु महतामस्मदत्याहितानाम् ॥ **49** ॥

रुन्ध्यात् संवर्तसन्ध्याघनपटलकनत्पक्षविक्षेपहेला -
वातूलास्फालतूलाञ्चलनिचयतुलाधेयदैतेयलोकः।
आस्माकैः कर्मपाकैरभिगतमहितानीकमप्रत्यनीकैः
दीव्यन् दिव्यापदानैर्दनुजविजयिनो वैजयन्तीशकुन्तः ॥ **50** ॥

यत्पक्षस्था त्रिवेदी त्रिगुणजलनिधिर्लङ्घ्यते यद्गुणज्ञैः
वर्गस्त्रैवर्गिकाणां गतिमिह लभते नाथवद्यत्सनाथः।
त्रैकाल्योपस्थितात् स त्रियुगनिधिरघादायतात् त्रायतां नः
त्रातानेकस्त्रिधाम्नस्त्रिदशरिपुचमूमोहनो वाहनेन्द्रः॥ **51** ॥

सैकां पञ्चाशतं यामतनुत विनतानन्दनं नन्दयिष्यन्
कृत्वा मौळौ तदाज्ञां कविकथकघटाकेसरी वेङ्कटेशः।
तामेतां शीलयन्तः शमितविषधरव्याधिदैवाधिपीडाः
काङ्क्षापौरस्त्यलाभाः कृतमितरफलैस्ताक्ष्र्यकल्पा भवन्ति॥ **52** ॥

॥ इति श्री गरुडपञ्चाशत् समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥